Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

# वैदिकं - वृष्टिविज्ञानम्

**Dr.G V Phaniraja Shastry**
SV Vedic University, Tirupati

वृषु - सेचने इति धातोः "स्त्रियां क्तिनि" इति सूत्रेण क्तिनि प्रत्यये सति निष्पन्नोऽयं "वृष्टि" शब्दः। वर्षणक्रियां बोधयति वृष्टिर्नाम पुरोवातादिसाध्यः मेघाधारकः जलोत्पादक-क्रियाविशेषः । सा च सामान्यवृष्टि - महावृष्टि - आसारशीकररूपेण भिद्यते। जलबिन्दु-सम्पातरूपः सामान्यवृष्टिरिति, जलधारासम्पातरूपः महावृष्टिरिति, धारायुक्तवेगवृष्टिः आसार इति वातादिप्रेरितजलकणरूपः शीकर इति कथ्यते ।

**वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ।**
**धारासम्पात आसार शीकरोऽम्बुकणाः स्मृताः[1]।।**

यद्यपि तैत्तिरीयश्रुतौ **"आपो वै वृष्टिः[2]"** इति वृष्टेः अब्रूपत्वं प्रतिपादितम्, वृष्टेः अबुत्पत्तौ सन्निहितकारणत्वेन अब्रूपत्वेन उपचरितुं शक्यत्वात् कृष्णयजुर्वेदीये "एतद्वै वृष्ट्यै रूपम्" इत्यादिना पुरोवातादीनां वृष्टिरूपत्वमभिधानं, तदपि पुरोवातादीनां तेषां अन्तरङ्ग-साधनत्वं वृष्टौ अभिप्रैति । तथा च मेघाधारकः अविच्छिन्न सततजलबिन्दुरूपः अविच्छिन्न जलधारसम्पातरूपो वा इति फलितम् ।

तथाभूतं वृष्टिजलं कथमायाति ? कथं वृष्टिः सम्पद्यते ? इति जिज्ञासायां सूर्यरश्मय एव मेघमुत्पादयन्तीति अवगम्यते, वायुपुराणे वृष्ट्युत्पत्तिप्रकारः -

**सूर्यः किरण जालेन वायुयुक्तेन सर्वशः।**
**जगतो जलमादत्ते कृत्स्नस्य द्विजसत्तमाः।।**
**आदीत्यपीतं सूर्याग्नेः सोमं सङ्क्रमते जलम् ।**
**नाडीभिर्वायुयुक्ताभिर्लोकाधानं प्रवर्तते[3] ।।**

तैत्तिरीयश्रुतौ प्रश्नोत्तराभ्यां अयमेव विषयःनिरूपयिष्यते "क्वेमा आपो निविशन्ते । यदीतोयान्ति सम्प्रति । काला अप्सु निविशन्ते। आपस्सूर्ये समाहिताः। अभ्राण्यपः प्रपद्यन्ते[4] इति। घर्मकाले अतितीक्ष्णैः सूर्यकिरणैः सर्वत्र जलाभावो दृश्यते । एवं सर्वत्र आपः सूर्यरश्मिभिः शोष्यमाणाः प्राणिभिर्दृश्यन्ते , भूमौ वर्तमानाः आपः यास्सन्ति ताः घर्मकाले भूमेः यान्ति, अत एव जलशोषः। तदानी इमाः आपः क्व निविशन्ते इति आसामपामाधारभूतः कः इति प्रश्नस्याशयः? तदानीं समाधीयते **"आपस्सूर्ये समाहिताः अभ्राण्यपः प्रपद्यन्ते"** इति भूमिष्ठाः आपः रश्मिद्वारा सूर्यमण्डले तिष्ठन्ति । तेभ्य सूर्यरश्मिभ्यः सकाशादभ्राणि जलं प्राप्नुवन्ति । यतो हि सूर्यरश्मयः स्वनिष्ठं जलं धूमज्योतिर्मरुतां सहयोगेन भूमौ अभ्राकारमापदयन्ति। अतोऽभ्रस्य रश्मिगताः आप एवोत्पत्तिकारणं आधारश्च।अतश्च या आपः दृश्यन्ते तास्सर्वा अपि रश्मिद्वारा सूर्ये समाहिता भवन्ति। तैत्तिरीयश्रुतौ अन्यत्रापि सूर्य एव स्वकिरणजालैः भूमिगतं जलं समाहृत्य पुनः प्राप्तावसरे मेघेभ्यः सम्प्रयच्छतीति प्रतिपाद्यते - "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति[5]" इति । तथा च श्रुति-स्मृतिवाक्यैश्च भूमिगतजलस्य सिद्धरूपस्य वा परिणामरूपमेव जलमुत्पद्यते। अयमाशयः वृष्टिजलं सिद्धरूपस्यैव परिणामः न तु अपूर्वं जलं मेघेषु जायते । विद्यमानमेव

---

[1] अ.को.1.3.13
[2] तै.आ.1.प्र
[3] वा.पु.51अ
[4] तै.आ.1.प्र
[5] तै.उ.4.प्र

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

जलं पुनर्नवं भूत्वा वृष्टिद्वारा प्रत्यागच्छतीति सुदृढमवगम्यते । एवञ्च सूर्यरश्मय उक्तरीत्या मेघमुत्पादयन्तीति भूमिजलस्यैव परिणामः वृष्टिजलमिति सिद्ध्यति। अयेमेवार्थः वायुपुराणे प्रपञ्चितः।

**एवमुत्क्षिप्यते चैव पतते च पुनर्जलम् ।**
**नानाप्रकारमुदकं तदेव परिवर्तते[6]।। इति**

हस्ती यथा करेण तोयं संगृह्णाति तथा इमे सूर्यरश्मयः भूतलात् आपः स्वीकुर्वन्ति।
हस्तीसमुद्रादादाय करेण जलमीप्सितम् ।
दद्यात् घनाय तद् दद्यात् वातेन प्रेरितो घनः[7]।।

परन्त्वत्र "भूमिगतजलस्य आदानप्रदानाभ्यां किं तादृशं विशिष्टं प्रयोजनं भवति" इति संशयो जागर्ति। ब्रह्मवैवर्तपुराणे

**सूर्याद्धि जायते तोयं तोयात्सस्यानि शाखिनः।**
**तेभ्योऽन्नानि फलान्येव तेभ्यो जीवन्ति जीविनः**
**सूर्यग्रस्तञ्च नीरञ्च काले तस्मात्समुद्भवः**
**सूर्यो मेघादयः सर्वे विधात्रा ते निरूपिताः[8]।। इति**

समुचितकाले क्षेत्रेषु यथोचितजलप्रदानम् । भूमेः यावज्जलं स्वीकृतं तस्य जलस्य सहस्राधिकगुणवृद्ध्याप्रदानञ्च इत्यादीनि प्रयोजनानि निरूपयितुं शक्यानि भवन्ति। तथाहि श्रूयते कालिदास वचः **"सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः"**। अतः पूर्वसिद्धमेव जलं शुद्धं नवञ्च भूत्वा सहस्राधिकगुणवत्तया वृष्ट्या पुनः भूमिमाप्नोतीति विशेषः।

**स्थाने स्थाने पृथिव्याञ्च काले काले यथोचितम्।**
**ईशेच्छया आविर्भूतं च न भवेत्प्रतिबन्धकम्[9]।**

वृष्टिजलोत्पत्तौ कानि साधकानि निरूपकानि भवन्ति ? वृष्टेर्निदानानि कानि इति चेत् तैत्तिरीयश्रुत्या वृष्टिजलोत्पत्तेः चत्वारि अन्तरङ्गसाधनानि तु भवन्तीति अवगम्यते "चत्वारि वा अपाँ रूपाणि" । "मेधो विद्युत् स्तनयिन्तुर्वृष्टिः। तान्येवारुन्धे[10]"। इति आरुणकेतुकाग्निचयनप्रकरणे अबिष्टकानामुपधानार्थमपां ग्रहणविधौ इमानि वाक्यानि श्रूयन्ते ।अत्र अपाँ रूपाणि इत्यत्र "अपां निरूपकाणि"इत्ययमर्थः व्याख्यातः। तथा च मेघ, विद्युत्, स्तनयिन्तुः वृष्टिः इत्येतानि चत्वारि वृष्टिजलोत्पत्तेः निरूपकानि अन्तरङ्गसाधनानि भवन्ति। तानि क्रमशः निरूप्यन्ते।

मिह-सेचेने इत्यस्माद्धातोः निष्पन्नोऽयं मेघशब्दः। मिह धातोः **"नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः"**[11] इति सूत्रेण अच्प्रत्ययः ततः **"न्यङ्क्वादीनां च**[12]" इति सूत्रेण कुत्वम् मेघ इति सिद्ध्यति। तथा च स्मृतिः

**मेहनाच्चमिहेर्धातोः मेघत्वं व्यञ्जयन्ति च ।**
**न भ्रश्यन्ति यतस्त्वापस्तदभ्रं कवयो विदुः[13] ।। इति**

मेघस्य क्रिया वर्षणमेव । तथा च "पर्जन्यो वर्षुको भवति" "वर्षापर्जन्यः"इति च पर्जन्यो मेघशब्देऽपि इति निरूक्तादितः पर्जन्यशब्दः मेघार्थक इत्यवगम्यते तथा च मेघः स्वोत्पादकवृष्टिक्रियाकर्तृत्वेन अपां निरूपको भवति। मेघेषु त्रैविध्यं वर्तते । तत्र वायुपुराणे-

---

[6] वा.पु.51अ
[7] वा.पु.51अ
[8] ब्र.वै.पु.21अ
[9] ब्र.वै.पु.21अ
[10] तै.आ.1प्र
[11] वै.सि.कौ.3.1.134
[12] वै.सि.कौ.7.3.53
[13] वा.पु.51अ

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**मेघानां पुनरुत्पत्ति स्त्रिविधा योनिरूच्यते ।**
**आग्नेयेया ब्रह्मजाश्चैव पक्षजाश्च पृथग्विधाः।।**
**त्रिधा घनाः समाख्याताः तेषां वक्ष्यामि सम्भवम्[14] । इति**

तत्रादौ आग्नेयमेघाः। तेषां लक्षणादिकं निरूप्यते।

**आग्नेयास्त्वर्णजाः प्रोक्तास्तेषां तस्मात्प्रवर्तनम् ।**
**शीतदुर्दिन वाता ये स्वगुणास्ते व्यवस्थिताः।।**
**महिषाश्च वराहाश्च मत्तमातङ्गगामिनः**
**भूत्वा धरणिमभ्येत्य विचरन्ति रमन्ति च ।।**
**जीमूता नाम ते मेघाः एतेभ्यो जीवसम्भवाः।**
**विद्युद्गुणविहीनाश्च जलधाराविलम्बिनः।।**
**मूका घना महाकाया प्रवहस्य वशानुगाः।**
**क्रोशमात्राच्च वर्षन्ति क्रोशार्धादपि वा पुनः।**
**पर्वताग्रनितम्बेषु वर्षन्ति च रमन्ति च**
**बलाकागर्दभाश्चैव बलाकागर्भधारिणः[15]।।**

त्रैविध्येषु मेघभेदेषु आग्नेयमेघः समुद्रात् समुत्पद्यते तस्य मेघस्य गुणास्तावत् - शैत्यं मेघच्छन्नत्वं वातयुक्तत्वं च भवन्ति।

आग्नेयमेघावरणेन महिषाः वराहाश्च भूमौ विचरन्ति, जीमूताः नाम मेघाः एतेभ्यो आग्नेयेभ्यो उत्पद्यन्ते अवान्तरभेदेन एतेषां मेघानां लक्षणन्तु - विद्युतः अभावः विलम्बनं मूकत्वं घनगर्जनं न भवति। जलप्रवाहस्य वशाः भवन्ति।

अयमाशयः-जीमूतमेघावरणेन घनगर्जनरहिता एवं तडिदभावा वृष्टिर्भवतीति। क्रोशदूरात् आकाशादुत्पद्यते वृष्टिः। आग्नेयगर्भजीमूतमेघावरणविषयमेतत्।

अनन्तरं द्वितीयः ब्रह्मजः मेघः-

**ब्रह्मजा नाम ते मेघा ब्रह्मनिःश्वास सम्भवाः।**
**ते हि विद्युद्गुणोपेताः स्वनयन्ति स्वनप्रियाः।।**
**तेषां शब्दप्रणादेन भूमिः स्वाङ्गरूहोद्गमा।**
**तेष्वियं प्रीतिमासक्ता भूतानां जीवितोद्भवा ।।**
**द्वितीयं प्रवहं वायुं मेघास्ते तु समाश्रिताः।**
**एते योजनमात्राच्च सार्धार्धान्निष्कृतादपि।।**
**वृष्टिसर्गस्तथा तेषां धारासाराः प्रकीतिताः[16]।।**

ब्रह्मणः निःश्वासादुत्पद्यन्ते इति ब्रह्मजाः मेघाः, स्वननमधिकं भवति। घनगर्जन-मधिकं भवति । एतेषां ब्रह्मजमेघावरणेन भूमौ वृक्षादीनां अङ्कुरोद्गमनं भवति । जीविनामु-द्भवाय इमे मेघाः सहकुर्वते इति भूमिरपि मेघानिमान् स्निह्यति। इमे मेघाः प्रवहनामकं वायुमाश्रयन्ति । एतेभ्यः ब्रह्मजमेघेभ्यः योजनदूरात् आकाशात् वृष्टिरुत्पद्यते। अतः धारापन्ना वृष्टिर्भवतीति एतेषां ब्रह्मजमेघानां विशेषः। त्रिविधेषु अन्तिमः पक्षजः मेघः तल्लक्षण्न्तु-

**पुष्करावर्तका नाम ये मेघाः पक्षसंभवाः।**

[14] वा.पु.51अ
[15] वा.पु.51अ
[16] वा.पु.51अ

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**शक्रेण पक्षच्छिना ये पर्वतानां महौजसाम् ।।**
**कामगानां प्रवृद्धानां भूतानां शिवमिच्छताम् ।**
**पुष्करा नाम ते मेघा बृहन्तस्तोयमत्सराः।।**
**नानारूपधराश्चैव महाघोरतराश्च ते ।**
**कल्पान्तवृष्टेः स्रष्टारः संवर्ताग्नेर्नियामकाः।।**
**वर्षन्त्येते युगान्तेषु तृतीयास्ते प्रकीर्तिताः।**

पुष्करावर्तकाःमेघाः पक्षजाः भवन्ति। पुरा काले पर्वतानां संचारः स्वेच्छया आसीत्, पक्षसहायात् ते पर्वताः उदडयन्त । तदानीं इन्द्रः पक्षच्छेदनमकरोत् । ततः पक्षेभ्यः उत्पन्नाः मेघाः पुष्करावर्तकाः बृहन्तः मेघाः जलाधिक्येन मत्सराः भवन्ति। कामरुपाः घोराश्च भवन्ति। कल्पान्ते वर्षन्ति इमे मेघाः अति विरला भवन्ति। सवंर्ताग्नेः (प्रलयाग्नेः) नियमाकाः भवन्ति। इमे युगान्ते महावृष्टिं वर्षन्ति । क्वचित् श्रूयते

**आवर्तो निर्जलो मेघः संवर्तश्च बहूदकः।**
**पुष्करो दुष्करजलो द्रोणः सम्यक् प्रपूरकः।। इति**

तथा च इमे पुष्करावर्तकाः मेघाः परमिति वायुमुपाश्रयन्ते । एवञ्च वृष्टिजलोत्पत्ति निरूपकेषु साधनेषु चतुर्षु आन्तरङ्गिकेषु स्मृत्याधारेण मेघस्य वृष्टिसाधनत्वं अवान्तरभेदपुरस्सरं निरूपितम्। यद्यपि धूमः ज्योतिः सलिलं मरुत् एते मिलित्वा मेघाकारं प्राप्नुवन्ति। उक्तञ्च कालिदासेन **"धूमज्योतिस्सलिल मरुतां सन्निपातः क्व मेघः[17]"** इति स च मेघः जलविमोचनाय सूर्यरश्मिद्वारा जलं स्वस्मिन् बिभर्ति इति जलमुक्, अभ्रम्, अम्बुभृत्, जलदः इति कथ्यते। एवञ्च मेघः वृष्टिक्रियायाः आधारत्वेन तत्कर्तृत्वेन च जलोत्पत्तये अन्तरङ्गसाधनं भवति।

चतुर्षु अपां स्थानेषु द्वितीया विद्युत्। मेघगर्भिता मेघान्तवर्तिनी सूर्यतेजोरूपा शक्यात्मिका विद्युत् । विद्युतश्च वृष्टिहेतुत्वमन्यत्र तैत्तिरीयश्रुतौ ज्ञायते तथा हि।

**"वाश्रेव विद्युन्तिमाति वत्सं न माता सिषक्ति। यदेषा वृष्टिरसर्जि[18]"** यदा मरूतां सम्बधिनी वृष्टिः असर्जि - स्रष्टा भवति तदा गर्जनसहिता विद्युत् मरुतः प्रति वाश्रेवं शब्दं कुर्वतीव प्रतिभाति। मरुद्भिस्सह सम्बध्यते च। तत्र दृष्टान्तः यथा प्रस्रवन्ती गौः वत्सं प्रतिकुर्वाणा मनुष्यैरवलोक्यते तेन वत्सेन सम्बध्यते। तद्वदियं विद्युदपि। अत्र च गर्जन-सहितायाः विद्युतः वृष्टिहेतुत्वं सिद्ध्यति। किञ्च विद्युतः शक्यात्मकत्वात्, शक्तिविहीनस्य मेघस्य वृष्टिकर्तृत्वासम्भावादपि विद्युतः जलोत्पादकत्वं सिद्ध्यति । अपि च यदि वयं परिशीलयामःसर्वथा विद्युतः वर्णं एकमेव न भवति। विद्युति भेदास्सन्ति प्रत्येकं विद्युद्वर्ण-भेदमाश्रित्य फलभेदोऽपि भवत्येव, वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणस्य **चतुर्थी सम्प्रदाने**[19] सूत्रव्याख्याने अयं विषयः उदाहृतः

**वाताय कपिला विद्युत् आतपायातिलोहिनी**
**पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत् । इति**

कपिला विद्युत् बृहते वाताय कल्पते । अतिरक्ता विद्युत् सूर्यप्रकाशाय कल्पते। पीतवर्णा महावृष्ट्यै, श्वेतवर्णा विद्युत् दुर्भिक्षाय प्रकल्पते इति।

अथ तृतीयः - स्तनयित्नुः - मेघान्तवर्तिवायुगतशब्दरूपविशेषः गर्जन विशेषः स्तनयित्नुः इति । तथा चा श्रुतौ श्रूयते

**"य एवं विद्वान् मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायौ[20]"** इति

[17] मेघ.पु.5श्लो
[18] तै.सं.3.1.11
[19] वै.सि.कौ.2.3.13
[20] तै.आ.प्र.2

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

पवमाने सति स्तन्यति वायौ गर्जनं कुर्वती सतीत्यर्थात्। किञ्चायमपि शक्यात्मक एव। अत एव विद्युत इव अस्यापि जलोत्पादकत्वं सिद्ध्यत्येव। क्वचित् तैत्तिरीये श्रूयते

**"अभिक्रन्द स्तनय गर्भमा धा उदन्वता परिदीया रथेन ।**
**अर्वाङ्तेन स्तनयित्नुने ह्यपो निषिञ्चन्नसुरः पिता नः"**[21] इति

तन्मन्त्रार्थस्तु हे अश्व। सर्वतश्शब्दं कुरु, मेघगर्जितमिवोच्चध्वनिं कुरु । गर्भमाधाः - मेघस्योदरे गर्भमाधेहि अनेन एवं ज्ञायते । मेघोदरे जलप्रपूरणाय गर्जन विशेषः अपेक्षितः। एवं हे वृषन्, त्वमेतेन स्तनयित्नुना गर्जनवता मेघेन सह अर्वाङेहि अम्बारादभिमुखमागच्छ इत्युक्तेश्चावगम्यते । गर्जनवतो मेघस्यैव वृष्टिहेतुत्वं नान्यस्य इति । अतः विद्युत् स्तनयित्नोरपि वृष्टिजलोत्पत्तौ अन्तरङ्गसाधनत्वं सिद्ध्यति।

वृष्टिक्रियायाः जलोत्पत्तौ अन्तरङ्गसाधनत्वञ्च सिद्धमेव। वर्षणात्मकक्रियायाः साक्षाज्जलोत्पत्तेरनुभवसिद्धत्वात् तस्याः अन्तरङ्गसाधनत्वनिरूपणप्रयासः अनपेक्षित एव। किञ्च पुरोवातोऽपि वृष्टिद्वारा जलोत्पत्तौ अन्तरङ्गसाधनमिति तैत्तिरीयश्रुत्या अवगम्यते।

अग्निचयनप्रकरणे

**"पुरोवातसनिरसीत्याहैतद्वै वृष्ट्यै रूपँ रूपेणैव वृष्टिमवरुन्धे**[22]**"** इति जलोत्पत्तेरन्त-रङ्गसाधनीभूतायाः वृष्टेरन्तरङ्गत्वेन मेघविद्युत्स्तनयित्नामिव पुरोवातस्यापि परिगणनं व्यधायि भाष्यकृद्भिः। अत एव श्रूयते कारीरेष्टि प्रकरणे पुरोवातविषये प्रार्थना ।

**"पुरोवातो वर्षन् जिन्वरावृत्स्वाहा**[23]**"** इति । किञ्च तस्मिन्नेव प्रकरणे अयं पुरोवातः मेघविदारणं कृत्वा वर्षधाराः सम्पादयतीत्यपि अवगम्यते।

**"मारुतमसि मरुतामोजोऽपां धाराम्भिन्धि उन्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः**
**उद्नो दिव्यस्य नो देहीशानो विसृजा दृतिम्"** ।। इति

मेघेषु प्रतिबद्धानामपाधारामुद्दिश्य प्रतिबन्धरूपं मेघं भिन्धि। हे पुनर्नवे पृथिवीमु-त्कर्षेणोत्क्लेदय। तदर्थं दिव्यमाकाशवद्व्यासं मेघमण्डलं विदारय । विदार्य च वर्षणमस्मभ्यं देहि। हे देव त्वमीशानः सन् उदकपूर्णहुतिसमानं मेघवर्षणाय विसृष्ट द्वारं कुरु।

एवंविध प्रार्थनानां पुरोवातविषये श्रवणात् तस्यापि अन्तरङ्गसाधनत्वं सिद्ध्यत्येव।

एतावत्पर्यन्तं वृष्टिजलोत्पत्तौ अन्तरङ्गसाधनानि निरूपितानि। एवमेव वृष्टिजलोत्पा-दने बहिरङ्गसाधनान्यपि वर्तन्ते। तेषु सूर्यः सोमः वायुः धूमः अग्निः इत्येवमादयो मुख्याः। तत्र सूर्यः स्वकीयैः सूर्यरश्मिभिः भूमिष्ठं जलं स्वमण्डलं प्रापयतीति प्रागुदाहृतश्रुत्या निरूपितमेव। तथा च श्रूयते **"आपस्सूर्ये समाहिताः"** इति । वायुपुराणे

**सूर्यः किरणजालेन वायुवेगेन सर्वशः।**
**जगतो जलमादत्ते कृत्स्नतो द्विजसत्तमाः।।** इति

वायुपुराणोक्त्या सूर्यकिरणैः सर्वतः जलस्वीकरणार्थं वायुः सहकारिकारणं भवतीति अवगम्यते। अत एव मनुनापि भणितम् **"आदित्याज्जायते वृष्टिः**[24]**"** इति।

सोमः - एवमादित्यगृहीतं जलं सोमं प्राप्य चन्द्रवृद्ध्यर्थं भवति । तथा हि श्रुतिः **"इतस्सिक्तँ सूर्यगतम्। चन्द्रमसे रसं कृधि"** इत्यादिना इतः अग्निद्वारा द्रव्यमादित्यं प्राप्य, जलं भूत्वा दिवि चन्द्रं भूमावोषधीश्चाभिवर्धयति इति। तदर्थोऽवगम्यते तुहिनरूपाणां किरणानां चन्द्रजन्यत्वञ्च चन्द्रमसो जलाधारत्वं स्पष्टमेव।

[21] तै.सं.3.1.11
[22] तै.सं.5.3.10
[23] तै.सं.2.4.7
[24] म.स्मृ.3.76

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

**आदित्यपीतं सूर्याग्निस्सोमं सङ्क्रमते जलम् ।**
**मेघा वायुनिघातेन विसृजन्ति जलं भुवि[25]। इति**

प्रागुदाहृतस्मृत्या वायुपुराणोक्त्या प्रतिपादितमेव, वृष्टिजलोत्पत्तावन्यतमः वायुः बहिरङ्गसाधनभूतः। वृष्ट्याः वायुरेव ईशः इति। तथा च श्रूयते **"वायुर्वै वृष्ट्या ईशे"** इति । कथमयं वायुः वृष्टीशो भवतीति संशये भूतलस्थजलस्य रश्मिभिः आदानप्रभृति वर्षणात्मकक्रियापर्यन्तं मध्यगत सर्वव्यवहारस्य वायोः क्रियासहकारित्वं दृश्यते । श्रुतौववं श्रूयते।

**"वराहवस्स्वतपसः विद्युन्महसो धूपयः। श्वापयो गृहमेधाश्चेत्येते ये चेमे शिमिविद्विषः। पर्जन्यास्सप्तपृथिवीमभिवर्षन्ति"** वराह इत्यारभ्य गृहमेधा इत्यन्तैः षड्भिः पदैः पर्जन्यप्रवर्तका मरूद्गणाः उच्यन्ते। एतेषां षण्णां गणरूपत्वात् एकैकगणस्थान् बहून् विवक्षित्वा "वराहवः" इत्यादि बहुवचननिर्देशः । वरं श्रेष्ठं वत्समाहृयतीति वराहुः ते च वराहवः।

स्वयमेव तपन्ति न तु तापार्थम् अग्निमादित्यं वा अपेक्षन्ते इति ते "स्वतपसः"। विद्युत्समानं महः तेजः येषां ते "विद्युन्महसः"। गुग्गुलु दशाङ्गादि द्रव्यान्तरानपेक्षेण स्वशरीरगतसुगन्धेनैव सर्वान्पदार्थान् धूपयन्तः वासितान्कुर्वन्तः वर्तन्ते।

"श्वापयः" श्वृशब्दः - आशुशब्दपर्यायः ततः शीघ्रव्यापिनः इत्युक्तं भवति । गृहेषु मेधारः "गृहमेधाः" चकारः षण्णां वायूनां समुच्चयार्थः। एवं षड्विधाः वायुगणाः एकदेशवर्तिनो निर्दिष्टाः।

शिमिः - कर्मकृत्यादिकम् तस्य विघातकाः शिमिविद्विषः। तद्विपरीता अशिमिवि-द्विषः कृष्याद्यनुकूलप्रवृत्तयो वायव इत्यर्थः।

एतैः सप्तभिः वायुगणैः प्रवर्तिताः सप्तविधाः मेघाः वृष्टिभिरस्माभिः दृश्यमानाभिः पृथिवीमभिलक्ष्य वर्षन्ति। इत्येषां वायूनां महिमा निराधारे अन्तरिक्षे मेघान् सम्पाद्य बहुविधजलसङ्ग्रहः यः अस्ति यस्य देश विशेषस्य यावदपेक्षितं तत्र तावदेव वर्षणं यच्चास्ति स सर्वोऽपि अचिन्त्यः तन्महिमा इति दर्शयितुम् इति शब्दप्रयोगः। अयञ्च वायुः यथा प्रवर्तकः तथा निवर्तकश्च भवतीति तैत्तिरीयश्रुत्या अवगम्यते । तत्र सामान्यतो वायुः मेघप्रवर्तकः पुरोवातरूपो वायुः मेघच्छेदनद्वारा वृष्टेः प्रवर्तकः एवं पश्चाद्वातः वृष्टेः निवर्तकः। तथा च श्रूयते-

**"पश्चाद्वातं प्रतिमीवति पुरोवातमेव जनयति वर्षस्यावरुध्यै[26]"।**

एवं वृक्षवायवोऽपि वृष्टिजलोत्पत्तये सहकारिणो भवन्ति । तथा चैवं वायोः वृष्टिसाधनत्वं बहिरङ्गकं प्रदर्शितम्।

धूमः - **असितवर्णा हरयस्सुपर्णामिहो वसाना दिवमुत्पतन्ति ।**
**त आववृत्रन्सदनानि कृत्वादित्पृथिवी घृतैर्व्युद्यते[27]** ।। इति

धूमस्य मेघोत्पादकत्वं तैत्तिरीयमन्त्रेषु श्रूयते । अयं च मन्त्रः कारीरीष्टि प्रकरणे विनियुज्यते । असितवर्णा इत्यादिना तादृशगुणोपेतः धूमः विवक्षितः। अग्निना दह्यमानाभ्यः करीरसक्तुपिण्डीभ्यो निर्गताः ये कृष्णवर्णयुक्ताः धूमाः ते दिवमुत्पतन्ति। तादृशाः धूमाः मेघनिष्पादनाय रसहरणशीलाः प्रसारितपक्षपक्षिसदृशाः पक्षिवदुत्पतनशीलाः मेघरूपा भूत्वा सूर्यमण्डलादिकमाच्छादयन्तः धूमनिष्पादिताश्च मेघाः स्वोदरेषु जलस्य स्थानानि कृत्वा इह वर्षितुमावृत्ताः। अनन्तरमेव पृथिवी घृतवत् क्षरद्भिः उदकैः विशेषेण क्लियते। एवंविधपर्यालोचनेन धूमस्य मेघाकारतापत्तिः स्पष्टं प्रतीयते।

अग्निः - अग्नेः जलोत्पत्तिसाधनत्वं उपनिषत्सु स्पष्टं प्रतिपादितम् ।तथाहि श्रूयते - तैत्तिरीयोपनिषदि **"अग्नेरापः"** इति । अग्नेः अपां संभूता इति तदर्थः एवं छान्दोग्येऽपि **"तत्तेजोऽसृजत" "तदपोऽसृजत"** इति निवर्त्य निवर्तकयोः वह्निजलयोः कथं समन्वयः इति प्रश्ने सति पञ्चीकृतयोः

---

[25] वा.पु.51अ
[26] तै.सं.2.4.8
[27] तै.सं.3.1.11

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :10.16(2026); IC VALUE:5.16; ISI VALUE:2.286
Peer-Peer Reviewed, Refereed & Open Access International Journal - As per UGC Norms
(Fulfilled Suggests Parameters of UGC by IJMER)
Volume:15, Issue:7(1), July 2026
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed: Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available: www.ijmer.in

दृश्यमानयोर्वह्निजलयोः विरोधे सत्यपि अपञ्चीकृतयोः तयोः श्रुत्येकसमधिगम्ययोः न विरोध इति। वस्तुतस्तु अस्मत् देहादिषु सन्तापाधिक्येन स्वेदजलोत्पत्तिः अनुभूयते, तथा सूर्यमण्डलात् विद्युद्रूपाच्च तेजसः वृष्टिजलात्पत्तेः प्रतिपादितत्वाच्च पञ्चीकृतयोरपि वह्निजलविशेषयोः न विरोध इत्येवावगन्तव्यम्।

**अग्नौ प्रास्ताहुतिस्सम्यक् आदित्यमुपतिष्ठते ।**
**आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रजाः[28]।।**

अग्नौ प्रक्षिप्तद्रव्यगतजलांशस्यापि धूम द्वारा मेघयुत्पादकत्वेन अग्नेरपि वृष्टिजलोत्पत्तौ बहिरङ्गसाधनत्वमस्त्येव । वस्तुगत्या मेघे वह्निरपि अन्तर्गततया वर्तत एव कालिदासादिवचनेन सुस्पष्टमवगतम् **"धूमज्योतिस्सलिलमरूतां सन्निपातः क्व मेघः"** इति। अतोऽग्नेः जलोत्पत्तौ बहिरङ्गसाधनत्वं अन्तरङ्गसाधनत्वञ्च वर्तते। यद्यपि पर्जन्यः स्वयं अवर्षिष्यन्निव पूर्वं स्थितः एताभिः देवताभिः सम्प्रेरितः क्षणमात्रेण पुरोवातादि सामग्रीं सम्पाद्य सर्वथा वर्षत्येव इति फलितम् ।

यद्यपि वेदेषु वृष्ट्युत्पादनाय अनेकाः अलौकिकोपायाः उपदिष्टाः। अधुनातने काले मेघविदारणाय लौकिकोपायाः समाश्रयन्ति। अवश्यम्फलदायिनो सर्वथा न भवन्ति। यद्यपि आधुनिक मार्ग श्रौतमार्गयोः वृष्ट्युत्पादनाय विवेचित अन्तरङ्ग-बहिरङ्ग साधनानां सम्प्रदान प्रकारः तुल्य एव। तथापि लौकिकप्रयत्नः अदृष्टरहितः पाक्षिकः फलप्रदः। श्रुत्युक्तमार्गे तु दैवसहकारसत्वात् कदाचित् फलविलाम्बेऽपि फलोत्पत्तिर्नियतेति अवगम्यते। एवञ्च वृष्टेः स्वरूपम् वृष्टिजलं सिद्धजलपरिणामि वा उत अपूर्वं वा इति, वृष्टिजलोत्पत्त्यै अन्तरङ्गसाधन - तदन्तर्गत मेघवैविध्यस्य परिशीलनं, वृष्टिजलोत्पत्तौ बहिरङ्गसाधन विवेचनं, श्रुति स्मृत्याधारेण निरूपितम् ।

अवधृतग्रन्थाः

1. वायुपुराणम्
Sri Venkateswara Arsha Bharati Trust, 1-10-140/1, Ashok Nagar, Hyd, 500020
2. ब्रह्मवैवर्तपुराणम्
Sri Venkateswara Arsha Bharati Trust, 1-10-140/1, Ashok Nagar, Hyd, 500020
3. वैयाकरणसिद्धान्तकौमुदी
Chowkhamba Press
Gopal Mandir Lane, Post Box No 129,
Varanasi, 221001
4. मनुस्मृतिः
Chowkhamba Press
Gopal Mandir Lane, Post Box No 129,
Varanasi, 221001
5. अमरकोशः
Chowkhamba Press
Gopal Mandir Lane, Post Box No 129,
Varanasi, 221001

[28] म.स्मृ.3.76